SL. No. : Z

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 46 ]
Total No. of Questions : 46 ]

**CCE RF**
**CCE RR**

[ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8
[ Total No. of Printed Pages : 8

ಸಂಕೇತ ಸಂಖ್ಯೆ : **67-S** **Code No. : 67-S**

# ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ

# Subject : Third Language — SANSKRIT

# तृतीय भाषा — संस्कृतम्

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**(ಶಾಲಾ ಅಭ್ಯರ್ಥಿ + ಪುನರಾವರ್ತಿತ ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / Regular Fresh + Regular Repeater)**

ದಿನಾಂಕ : 10. 04. 2017 ] [ Date : 10. 04. 2017

ಸಮಯ : ಬೆಳಿಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 12-00 ರವರೆಗೆ ] [ Time : 9-30 A.M. to 12-00 Noon

ಗರಿಷ್ಠ ಅಂಕಗಳು : 80 ] [ Max. Marks : 80

## *ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 46 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

## *छात्रं प्रति सामान्यनियमाः*

1. अस्मिन् प्रश्नपत्रे षट्चत्वारिंशत् (46) वस्तुनिष्ठाः व्यक्तिनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तय । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति पर्यालोचय ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकतयाः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारिता समयावधिः प्रश्नपत्रस्य उपरि भागे लिखिता अस्ति । यस्मिन् पञ्चदशपलानि प्रश्नपत्रस्य पठनार्थं निर्धारितानि सन्ति ।

**RF+RR-0K1042** [ Turn over

इतः कर्तय

TEAR HERE TO OPEN THE QUESTION PAPER
प्रश्नपत्रमुद्घाटयितुमितः कर्तय

Tear here

## भागः - A

### ( गद्यम्-पद्यम्-पूरकपाठाः )

I. एकवाक्येन उत्तरं लिखत — 10 × 1 = 10

1. मेलुकोटे कस्मिन् मण्डले अस्ति ?
2. विवेकानन्दः स्वशिष्यं कुत्र प्रेषयति स्म ?
3. कृष्णः कर्णं कैः अभिनन्दति स्म ?
4. कः गुणः विक्रमार्के अवर्तत ?
5. विक्रमस्य कस्मिन् ममत्त्वं नास्ति ?
6. सर्वविद्यानां निधिः कः ?
7. केन सदृशं पवित्रं नास्ति ?
8. कः इन्दुः क्षीरनिधाविव प्रसूतः ?
9. केषां मैत्री छायेव भवति ?
10. पूज्यनदी का ?

II. संयोज्य लिखत — 4 × 1 = 4

| *अ* | | *आ* |
|---|---|---|
| 11. जानकी | a) | पादपाः |
| 12. अभिज्ञानशाकुन्तलम् | b) | सीता |
| 13. सुबद्धमूलाः | c) | मण्दोदरी |
| 14. अशनम् | d) | नाटकम् |
| | e) | प्रकरणम् |
| | f) | आहारः । |

III. **द्वि-त्रैः** वाक्यैः संस्कृतभाषया उत्तरं लिखत – $2 \times 2 = 4$

15. मेलुकोटे क्षेत्रस्य नामान्तराणि कानि ?

16. ग्रन्थालयस्य ग्रन्थपालः किम् अचिन्तयत् ?

**अथवा**

एकाग्रतायाः विषये विवेकानन्दः किम् अवदत् ?

IV. श्लोकतात्पर्यं कन्नडभाषया आंग्लभाषया वा लिखत – $2 \times 2 = 4$

17. न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ।।

18. भाषा भिन्ना वेषो भिन्नः
नीतिर्भिन्ना नियमो भिन्नः ।
भिन्ना जातिः भिन्नञ्च कुलम्
भिन्नावेव हि मतधर्मौ ।।

**अथवा**

भारतवासिषु बाह्ये भेदे
बहुत्र बहुधा दृष्टेऽपि ।
आन्तरङ्गिकी संस्कृतिरेका
सनातनी नो बध्नाति ।।

V. संस्कृतभाषया अनुवादं कुरुत – 2

19. ನಗರದ ಸಮೀಪದಲ್ಲಿ ಸುಂದರವಾದ ಉದ್ಯಾನವಿದೆ. ಉದ್ಯಾನದಲ್ಲಿ ವಿಶಾಲವಾದ ಸರೋವರವಿದೆ.

कर्नाटकभाषया अनुवादं कुरुत – 2

20. नारिकेलवृक्षः कल्पवृक्षः इति भूलोके जनाः भावयन्ति । अस्य वृक्षस्य सर्वे भागाः उपयोगाय भवन्ति ।

VI. कवेः देश-काल-ग्रन्थानां विषये लिखत – 3

21. भोजराजः

**अथवा**

वेदव्यासः ।

VII. यथानिर्देशम् उत्तरं लिखत – 2 × 3 = 6

22. "भवतः का गतिः भवेत् ?"

कः पाठः ? कः अवदत् ? कम् अवदत् ?

23. "जृम्भस्व सिंह ! दन्तान् ते गणयिष्ये"

कः पाठः ? कः अवदत् ? कम् अवदत् ?

VIII. कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा उत्तरं लिखत – 3 × 3 = 9

24. विश्वसंस्कृतपुस्तकमेलायाः वैभवं वर्णयत ।

25. दिलीपः कीदृशः राजा आसीत् ? इति वर्णयत ।

26. "अक्कमहादेवी" विषये लिखत ।

**अथवा**

लक्ष्मीस्वरूपं वर्णयत ।

IX. श्लोकं पूरयत – 4

27. शारदा ...................................................................................।

........................................................................... क्रियात् ।।

## भागः - B

### ( व्याकरणविभागः )

X. निम्नलिखितेषु प्रश्नेषु अपूर्णविवरणेषु वा प्रत्येकाय चत्वारः विकल्पाः प्रदत्ताः । तेषु एकमेव शुद्धं उपयुक्तं वा वर्तते । सम्यक् उत्तरस्य चयनम् कृत्वा लिखत – 12 × 1 = 12

28. 'आचार्यः' अस्य समानार्थकपदम् एवम् अस्ति –

(A) वैद्यः (B) गुरुः

(C) अर्चकः (D) सदाचारः ।

29. 'आदरः' अस्य विरुद्धार्थकपदम् एवम् अस्ति –

(A) आधारः (B) आचारः

(C) अनादरः (D) उपचारः ।

30. "सदयं हृदयं येन" अत्र शुद्धं वाक्यम् इदम् अस्ति –

(A) सदयं हृदयं येन (B) सदयं हृदयं यस्मै

(C) सदयं हृदयं यस्मात् (D) सदयं हृदयं यस्य ।

31. विक्रमार्कः, भोजराजः, योगिनीचक्रदेवता, पाषाणपादपाः-अत्र समूहेतर-पदम् इदं भवति –

(A) पाषाणपादपाः (B) भोजराजः

(C) योगिनीचक्रदेवता (D) विक्रमार्कः ।

32. 'एकाग्रतायाः' अत्र एषा विभक्तिः –

(A) प्रथमा (B) द्वितीया

(C) चतुर्थी (D) पञ्चमी ।

33. 'योगी' अस्य अन्यलिङ्गरूपम् एवं भवति –

(A) योगिन् (B) योगिनी

(C) योगः (D) योगा ।

34. 'गच्छन्ति' अस्य एकवचनरूपम् एवम् अस्ति –

(A) गच्छति (B) गच्छसि

(C) गच्छामि (D) गच्छतः ।

35. 'बालस्तत्र' अत्र सन्धिविभागः एवं भवति –

(A) बालः + तत्र (B) बाल + तत्र

(C) बालो + तत्र (D) बालस् + तत्र ।

36. 'हरिरेव' अस्य विसर्गस्य एषः आदेशः भवति –

(A) सकारः (B) उकारः

(C) लोपः (D) रकारः ।

37. 'पूर्वपदार्थप्रधानः' अयं समासः –

(A) बहुव्रीहिः (B) अव्ययीभावः

(C) तत्पुरुषः (D) द्वन्द्वः ।

38. अत्र अयं व्यधिकरणबहुव्रीहिः भवति –

(A) प्राप्तः आनन्दः यं सः (B) लम्बम् उदरं यस्य सः

(C) शूलं पाणौ यस्य सः (D) पीतम् अम्बरं यस्य सः ।

39. 'प्रयच्छति' अत्र एषः लकारः अस्ति –

(A) लोट् (B) लट्

(C) लट् (D) लुट् ।

XI. चतुर्थपदं लिखत – $2 \times 1 = 2$

40. i) अमृतस्य भावः – अमृतत्त्वम् :: पशोः भावः – ................ ।

ii) सुमित्रायाः अपत्यं पुमान्-सौमित्रिः :: जनकस्य अपत्यं स्त्री – ............................ ।

कृदन्तपदं चित्वा लिखत – $2 \times 1 = 2$

41. i) रजनी विज्ञानं ज्ञातुम् इच्छति ।

ii) बालकेन पाठः पठितव्यः ।

## भागः - C

### ( रचनाविभागः )

XII. अलङ्कारं विवृणुत – 2

42. 'गगनं गगनाकारम्'

XIII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दसः नाम लिखत – 2

43. 'ज्योत्स्नां विनापि निवसेन्निशि शीतभानुः'

XIV. पत्रं लिखत – 4

44. दिनद्वयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

शालाप्रवासविषये मित्रं प्रति पत्रं लिखत ।

XV. प्रबन्धम् लिखत – 4

45. संस्कृतभाषायाः गरिमा ।

**अथवा**

परिसरसंरक्षणम् ।

XVI. गद्यभागं पठित्वा प्रश्नानां उत्तरं लिखत – 4 × 1 = 4

46. कस्मिश्चित् ग्रामे कश्चन वणिक् आसीत् । तस्य गृहस्य प्राङ्गणे प्रतिदिनम् एकः काकः आगत्य तत्र पतितम् उच्छिष्टं खादति स्म । वणिजः गृहजनानां सर्वेषां तस्य काकस्य परिचयः आसीत् । कदाचित् तत्र केचन हंसाः आगताः । हंसाः वयं मानससरोवरात् उड्डयनं कुर्वन्तः आगताः इति अवदन् । तत् श्रुत्वा वणिजः गृहस्य बालकाः काकं दर्शयित्वा उक्तवन्तः - ''एषः काकः अपि बहुदूरम् उड्डयते । तावदेव न एषः बहुविधान् उड्डयनप्रकारान् जानति'' इति ।

i) कस्मिश्चित् ग्रामे कः आसीत् ?

ii) काकः तत्र पतितं किं खादति स्म ?

iii) कदाचित् तत्र के आगताः ?

iv) 'खादति' क्रियापदं कस्मिन् लकारे अस्ति ?